श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

पलक्कुलम् त्रिविक्रमन् नम्बूदिरि विरचितम्

# ॥ श्री गुरुमरुत्पुराधीशस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गुरुमरुत्पुराधीशस्तोत्रम् ॥

गरुडवाहनं पुण्यदर्शनं वरझषाकृतिं वेदसङ्ग्रहम्।
प्रलयकालजीवात्मतारकं गुरुमरुत्पुराधीशमाश्रये ॥ 1 ॥

प्रणवमानसं प्राणजीवनं प्रकटकच्छपाकारमीश्वरम्।
अमृतदायकं नित्यनूतनं गुरुमरुत्पुराधीशमाश्रये ॥ 2 ॥

सुकृतकल्पकं सामतोषितं सकलवैष्णवाकारसूकरम्।
भुवनभूषणालङ्कृतं विभुं गुरुमरुत्पुराधीशमाश्रये ॥ 3 ॥

वरदमीश्वरं नारसिंहकं वपुषि भीकरं पुण्यपूरकम्।
सुरगणावृतं भक्तवत्सलं गुरुमरुत्पुराधीशमाश्रये ॥ 4 ॥

चरितविश्रुतं वामनाकृतिं परमपूरुषं यागसाधकम्।
परपदप्रदं पापनाशकं गुरुमरुत्पुराधीशमाश्रये ॥ 5 ॥

भृगुकुलोद्भवं रामनामकं सुगुणभासुरं रेणुकात्मजम्।
नृवरतापसं केरळाधिपं गुरुमरुत्पुराधीशमाश्रये ॥ 6 ॥

दशरथात्मजं रामभद्रकं शरधनुर्धरं रावणान्तकम्।
पुरुषमव्ययं श्रीनिकेतनं गुरुमरुत्पुराधीशमाश्रये ॥ 7 ॥

वरहलायुधं रोहिणीसुतं गिरिधराग्रजं रामदैवतम्।
गजगणप्रियं धीमतां वरं गुरुमरुत्पुराधीशमाश्रये ॥ 8 ॥

धृतसुदर्शनं कृष्णमच्युतं विजयसारथिं गीतसारसम्।
पशुपगोपिकानर्तनप्रियं गुरुमरुत्पुराधीशमाश्रये॥ 9 ॥

दशविधाकृतिं कल्किवैभवं भुजगतल्पगं भूतभावनम्।
निखिलरोगसंहारकारकं गुरुमरुत्पुराधीशमाश्रये॥ 10 ॥

दशककीर्तनं श्रीधरात्मकं पदमनामयं ईश्वरार्पितम्।
परममङ्गळं भाग्यदायकं गुरुमरुत्पुराधीशमाश्रये॥ 11 ॥

॥ इति श्री गुरुमरुत्पुराधीशस्तोत्रं समाप्तम्॥